International Journal of Sanskrit Research 2021; 7(1): 254-255

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 254-255
© 2021 IJSR
www.anantaajournal.com
Received: 13-11-2020
Accepted: 20-12-2020

**प्रसेनजित् दास:**
सहशिक्षक:, मनिकोडा उच्च:
विद्यालय: (उ मा):, मालदा,
पश्चिम बंगाल, भारत

**Corresponding Author:**
**प्रसेनजित् दास:**
सहशिक्षक, मनिकोडा उच्च:
विद्यालय: (उ मा):, मालदा,
पश्चिम बंगाल, भारत

# व्यञ्जनावृत्तिविचारः

**प्रसेनजित् दास:**

**भूमिका-**

सहृदयहृदयसंवेद्यमानं काव्यं भवति इह जगति रसासाद्यमानस्य मुख्यमार्गम्। तस्य काव्यस्य शरीरं शब्दार्थाभ्यां भवति। शब्दार्थयोः सम्बन्धः नित्यः इति मीमांसावादिनः स्वीकुर्वन्ति, नैयायिकाः तु अनित्यम् इति स्वीकुर्वन्ति। शब्दात् अर्थः काभिः शक्तिभिः अवगम्यते, अभिधाशक्तिः प्रायः सर्वैः विद्वद्भिर्मुक्तकण्ठं स्वीक्रियते। नैयायिका मीमांसकाश्च लक्षणाशक्तिमपि स्वीकुर्वन्ति। परन्तु व्यञ्जनाशक्तौ प्राच्यसाहित्यिका एव बद्धादरा दरिदृश्यन्ते। कारणं व्यञ्जनाशक्त्या प्रतिपाद्यव्यङ्ग्य एव काव्यस्य साहित्यशास्त्रस्य चाधारस्तम्भभूतः। अनेन व्यङ्ग्येन रसस्योत्पत्तिर्भवति। येन सहृदयाः काव्यरसिका आह्लादिकाः भवन्ति। व्यङ्ग्यार्थः प्रतीयमानार्थरूपेण सहृदयहृदयसंवेद्यः भवति, यत् काव्यस्य सारभूतं तत्त्वं भवति। तच्च प्रतीयमानं नाभिधया न वा लक्षणशक्त्या बोद्धुं शक्यम्। अतो व्यञ्जनैवैका शक्तिर्यत्तत्त्वं बोधयितुं शक्या। अलङ्कारशास्त्रस्याद्यग्रन्थे नाट्यशास्त्रे आचार्यभरतेन यद्यपि व्यञ्जनाव्यापारस्य स्पष्टतया उल्लेखः न कृतः तथापि नाट्ये मुख्यतयाऽऽस्वाद्यमानस्य रसस्य व्यङ्ग्यत्वं न केनापि निराकर्तुं शक्यते, यस्य प्रतिपादनं "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः [1] " आचार्येण भरतेन कृतम्। तेन च रसस्य सर्वश्रेष्ठप्रतिपाद्यत्वं अनया कारिकया प्रतिपादितम्—

"न हि रसादृते कश्चिदर्थः प्रवर्तते" इति।

केचन आलङ्कारिकाः अलङ्कारेषु व्यङ्ग्यत्वं स्वीकुर्वन्ति। भामहोद्भटभोजादयः पर्यायोक्तादिष्वलङ्कारेषु व्यङ्ग्यत्वं स्वीकुर्वन्ति।
आनन्दवर्धनाचार्येण व्यञ्जनायाः प्रतिष्ठा कृता।
यथा-

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥[2]

साहित्यशास्त्रे व्यञ्जकत्वं ध्वनिना एव स्वार्थं प्रकाशयति यदपूर्वं भवति। किन्तु वैयाकरणिकाः व्यञ्जकत्वसाम्यात् श्रूयमानेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तेन तस्मिन् प्रसङ्गे ध्वन्यालोके उक्तम्—

---

[1] नाट्यशास्त्रम्, ६ /पृ.९३
[2] ध्वन्यालोकः, १/४

प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमानेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिः वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः[3]।

व्याकरणशास्त्रे शब्दः ध्वनिरित्युच्यते। महाभाष्यकारेण पतञ्जलिना उक्तम्-

"अथवा प्रतीतपदार्थको लोके ध्वनिश्शब्द उच्यते"[4]।

ध्वनिरिति कथनप्रसङ्गे वाक्यपदीये भर्तृहरिणा उक्तम्—

यः संयोगवियोगाभ्यां करणैरुपजन्यते।
सः स्फोटश्शब्दजाश्शब्दो ध्वनयोऽन्यैरुदाहृताः॥
प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते॥
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदास्तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते[5]॥ इति।

भर्तृहरेः व्यक्तव्यमस्ति यत् वर्णा आविर्भूताः सन्तस्तिरोहीयन्ते। अतो अनेक वर्णात्मकपदप्रत्यक्षं दुर्घटम्। यस्मान्मध्यमानादाभिव्यङ्ग्यं नित्यमखण्डात्मकं शब्दस्वरूपं शाब्दबोधोपयोगिनं स्फोटं व्यञ्जकं मध्यमानादरूपश्च ध्वनिरिति भर्तृहरेराशयः।

एवं वैयाकरणानां नित्यानित्यशब्दयोः व्यङ्ग्यव्यञ्जकसाम्यात् काव्येऽपि व्यङ्ग्यार्थस्य व्यञ्जकं शब्दमर्थञ्च ध्वनिरिति वदन्ति आलङ्कारिकाः।

ध्वन्यालोककारानन्दवर्धनाचार्यात्परं मम्मटविश्वनाथजगन्नाथादयोऽन्ये आलङ्कारिकाः व्यञ्जनाव्यापारं समर्थयन्ति। परन्तु महिमभट्टधनञ्जयधनिकादयः तस्या विरोधमपि कुर्वन्ति।

व्यक्तिविवेककारः महिमभट्टः अभिधां केवलं स्वीकरोति। सः अर्थं वाच्यानुमेयत्वेन स्वीकरोति। अनुमेयार्थस्य च वाच्यार्थद्वारेणानुमितिर्भवतीति प्रतिपादयति। काव्यप्रकाशकारः महिमभट्टस्य व्यङ्ग्यस्यानुमितिं दूषयति।

व्यञ्जनाव्यापारं विशिष्टतया मम्मटः स्वीकरोति—

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते॥[6]
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।

प्रयोजनार्थे व्यञ्जनाव्यापारं स्वीकरोति। प्रयोजनस्य प्रतीत्यर्थं लक्षणायाः आश्रयः भवति। लक्षणां विना अथवा लाक्षणिकशब्दं विना व्यञ्जना न भवति। लाक्षणिकशब्दे अवश्यमेव प्रयोजनमस्ति एव। यथा—

गङ्गायां घोषः इत्यत्र लाक्षणिकपदं गङ्गातटे घोषः। तत्र प्रयोजनं व्यङ्ग्यत्वेन अस्त्येव। तत् भवति शीतत्वपावनत्वादि। गङ्गाशब्दः स्रोतसि सबाध इति तटं लक्षयति, तद्वद् यदि तटेऽपि सबाधः स्यात् तत् प्रयोजनं लक्षयेत्। न च तटं मुख्योऽर्थः।

एवं प्रकारेण मीमांसकाः, नैयायिकाः, वैयाकरणिकाः वेदान्तिनः व्यञ्जनावृत्तिं न स्वीकुर्वन्ति। साहित्यिकेष्वपि सर्वेषु सम्प्रदायेषु ध्वनिसम्प्रदाय एव व्यञ्जनाशक्तेः आवश्यकतां स्वीकुर्वन्ति। यतो हि ध्वनेः रसस्य च आधारमूला व्यञ्जनैव। काव्यरसिकाः सहृदयाः यथा व्यङ्ग्ये एव रूचिः प्रकटयन्ति तथा वाच्यलक्ष्योर्मध्ये न। यथा उदकार्थं द्रोणिः साधनत्वेन प्रयुज्यते तथा व्यङ्ग्यार्थबोधनार्थमन्येषां वाच्यादीनामर्थानां बोध्यम्, तावदमात्रम्। यथाऽऽलोकार्थी दीपशिखायां यत्नवान् तथा व्यङ्ग्यार्थास्वादार्थी वाच्याद्यर्थेऽपि। उक्तं चानन्दवर्धनेन—

आलोकार्थी यथा दीपशिखायां यत्नवान् जनः।
तदुपायतया, तद्वदर्थे वाच्ये तदादृतः॥[7]

**सन्दर्भग्रन्थसूचि**


1. ध्वन्यालोकः, चौखम्बासंस्कृतभवनम्, वाराणसी, २०१०।
2. अभिधावृत्तिमातृका एवंशब्दव्यापारविचारः,ईस्टर्न बुक लिंकर्स,२००७।
3. काव्यप्रकाशः, आज भवनम्, सन्त कबीर मार्ग, वाराणसी, २०१६।
4. साहित्यदर्पणम्, चौखम्बा कृष्णदास अकादमी।


---

[3] ध्वन्यालोकः प्रथमोद्यतः
[4] व्याकरणमहाभाष्यम् पष्पशाह्निकम्, १/१/१
[5] वाक्यपदीयम्, ब्रह्मकाण्डम्, १०१, ८२, ७६ कारिकाः
[6] काव्यप्रकाशः २/१४
[7] ध्वन्यालोकः १/९